योषिता १६ जोषित् १७ जोषा १८ जोषिता १९ धनिका २० महेलिका २१ महेला २२ । इति शब्दरत्नावली ॥ शर्व्वरी २३ योषीत् २४ सिन्दूरतिलका २५ सुभ्रूः २६ । इति जटाधरः ॥ अस्या उत्पत्तिकारणं यथा,—
"मातृरक्तोत्तरा नारी ।" अन्यच्च ।
"विषमायां तिथौ क्षिप्रं कुर्य्याद्बीजन्तु कन्य-
काम् ॥"
इति सुखबोधः ॥

तस्याश्चतस्रो जातयः । यथा,—
"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
चतस्रो जातयो नार्य्या रतौ ज्ञेया विशेषतः ॥"
इति रसमञ्जरी ॥

( आसां लक्षणादिकं यदुक्तं रतिमञ्जर्य्याम् । ४—१३ ।
"भवति कमलनेत्रा नासिका क्षुद्ररन्ध्रा
अविरलकुचयुग्मा चारुकेशी केशाङ्गी ।
मृदुवचनसुशीला गीतवाद्यानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा ॥
भवति रतिरसज्ञा नातिखर्व्वा न दीर्घा
तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी ।
घनकठिनकुचाढ्या सुन्दरी बद्धशीला
सकलगुणसमेता चित्रिणी चित्रवक्त्रा ॥
दीर्घातिदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता ।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा ॥
स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला ।
कामोत्सुका गाढ़रतिप्रिया या
नितान्तभोक्त्री करिणी मता सा ॥
शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम् ।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम् ॥
पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी ।
शङ्खिनी क्षारगन्धा च मदगन्धा च हस्तिनी ॥
बाला च तरुणी प्रौढ़ा वृद्धा भवति नायिका ।
गुणयोगेन रन्तव्या नारी वश्या भवेत्तदा ॥
आ षोड़शाद् भवेद्बाला तरुणी त्रिंशका मता ।
पञ्चपञ्चाशका प्रौढ़ा भवेद्वृद्धा ततः परम् ॥
फलमूलादिभिर्बाला तरुणी रतियोगतः ।
प्रेमदानादिभिः प्रौढ़ा वृद्धा च दृढ़ताड़नात् ॥
बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥" )

सा त्रिविधा यथा,—
"योषितस्त्रिविधा ब्रह्मन्! गृहिणां मूढ़चेतसाम् ।
साध्वी भोग्या च कुलटा ताः सर्व्वाः स्वार्थतत्-
पराः ।
परलोकभयात् साध्वी तथेह यशसा जनः ।
कामस्नेहाच्च कुरुते भर्त्तुः सेवाञ्च सन्ततम् ॥१॥
भोग्या भोग्यार्थिनी शश्वत् कामस्नेहेऽथ केव-
लम् ।
कुरुते पतिसेवाञ्च न च भोग्या दृढ़ेच्छया ॥
वस्त्रालङ्कारसम्भोगं सुस्निग्धाहारसुत्तमम् ।
यावत् प्राप्नोति सा भोग्या तावच्च वशगा
प्रिया ॥२॥
कुलाङ्गारसमा नारी कुलटा कुलकामिनी ।
कपटात् कुरुते सेवां स्वामिनो न च भक्तितः ॥
सदा पुंयोगमाशंसुर्मनसा मदनातुरा ।
आहारादधिकं जारं प्रार्थयन्ती नवं नवम् ॥
जारार्थे स्वपतिं तात ! हन्तुमिच्छति पुंश्चली ।
तस्यां यो विश्वसेन्मूढ़ो जीवनन्तस्य निष्फलम् ॥
कथिता योषितः सर्व्वा उत्तमाधममध्यमाः ।
स्वात्मारामा विजानन्ति मनसा तां न
पण्डिताः ॥" ३ ॥

तस्याः स्वभावो यथा,—
"हृदयं क्षुरधाराभं शरत्पद्मोत्सवं मुखम् ।
सुधोपमं सुमधुरं वचनं स्वार्थसिद्धये ॥
प्रकोपे विषतुल्यं तदनूहं शीलकुत्सितम् ।
दुर्ज्ञेयं तदभिप्रायं निगूढं कर्म्म केवलम् ॥
तदा तासामविनयं प्रबलं साहसं परम् ।
ददौ कार्य्यच्छलात् कार्य्यं शश्वन्माया दूरत्यया ॥
पुंसश्चाष्टगुणः कामः शश्वत्कामो जगद्गुरो ! ।
आहारो द्विगुणो नित्यं नैष्ठुर्य्यञ्च चतुर्गुणम् ।
कोपः पुंसः षड्गुणश्च व्यवसायश्च निश्चितम् ॥
यत्रेमे दोषनिवहाः काऽऽस्था तत्र पितामह ! ।
का क्रीड़ा किं सुखं पुंसो विण्मूत्राश्रयवेश्मनि ॥
तेजः प्रनष्टं सम्भोगे दिवालापे यशःक्षयः ।
धनक्षयस्त्वतिप्रीतौ रत्यासक्तौ वपुःक्षयः ॥
साहित्ये पौरुषं नष्टं कलहे माननाशनम् ।
सर्व्वनाशश्च विश्वासे ब्रह्मन्नारीषु किं सुखम् ॥
यावद्धनी च तेजस्वी सश्रीको योग्यतापरः ।
पुमान्नारीं वशीकर्त्तुं समर्थस्तावदेव हि ॥
रोगिणं निर्गुणं वृद्धं योषिन्नापेक्षते प्रियम् ।
लोकाचारतया तस्मै दद्यात्याहारमल्पकम् ॥"
इति ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डे २३ अध्यायः ॥

( नारीचरित्रदूषणकारणानि यथा, हितोप-देशे । १ । १३१—१३२ ।
"स्वातन्त्र्यं पितृमन्दिरे निवसतिर्यात्रोत्सवे सङ्गतिः
गोष्ठी पूरुषसन्निधावनियमो वासो विदेशे तथा ।
संसर्गः सह पुंश्चलीभिरसकृत् वृत्तेर्निजायाः
क्षतिः
पत्युर्वार्द्धकमीर्षितं प्रवसनं नाशस्य हेतुः
स्त्रियाः ॥"
अपरञ्च,—
"पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥"
इयन्तु यथानियमं प्रतिपालिता कल्याणकरी श्रीवृद्धिकारिणी च । यदुक्तं मनौ ।३।५५—६० ।
"पितृभिर्भ्रातृभिश्चैताः पतिभिर्द्देवरैस्तथा ।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥
यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्व्वास्तत्राफलाः क्रियाः ॥
शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम् ।
न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्व्वदा ॥
जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः ।
तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥
तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ।
सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च ।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥")

अगम्या नार्य्यो यथा,—
"माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी तथा ॥
भागिनेयी तथा चैव राजपत्नी तथैव च ।
तथा प्रव्रजिता नारी वर्णोत्कृष्टा तथैव च ॥
इत्यगम्यास्तु निर्द्दिष्टास्तासान्तु गमने नरः ।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति ॥"
इति मत्स्यपुराणे २०१ अध्यायः ॥

तस्याः शुभलक्षणं यथा,—
"निगूढ़गुल्फौ पतितौ पद्मकान्तितलौ शुभौ ।
अस्वेदिनौ मृदुतलौ मत्स्याङ्कमकरान्वितौ ॥
वज्राब्जहलचिह्नौ च दास्याः पादौ ततोऽन्यथा ।
जङ्घे च रोमरहिते सुवृत्ते विशिरे शुभे ॥
अनुल्बणं सन्धिदेशं समं जानुद्वयं शुभम् ।
ऊरू करिकराकारावरोमौ च समौ शुभौ ॥
अश्वत्थपत्रसदृशं विपुलं गुह्यमुत्तमम् ।
श्रोणीललाटकं स्त्रीणामुरु कूर्म्मोन्नतं शुभम् ॥
गूढ़ो मणिश्च शुभदो नितम्बश्च गुरुः शुभः ।
विस्तीर्णमांसोपचिता गम्भीरा विपुला शुभा ॥
नाभिः प्रदक्षिणावर्त्ता मध्यं त्रिवलिशोभनम् ।
अरोमशौ स्तनौ पीनौ घनावविषमौ शुभौ ॥
कठिनावरोम उरो मृदुग्रीवा च कम्बुता ।
आरक्तावधरौ श्रेष्ठौ मांसलं वर्त्तुलं मुखम् ॥
कुन्दपुष्पसमा दन्ता भाषितं कोकिलासमम् ।
दाक्षिण्ययुक्तमशठं हंसशब्दसुखावहम् ॥
नासा समा समपुटा स्त्रीणान्तु रुचिरा शुभा ।
नीलोत्पलनिभं चक्षुर्नासंलग्नौ न लम्बकौ ॥
न पृथू बालेन्दुनिभे भ्रुवौ चाथ ललाटकम् ।
शुभमर्द्धेन्दुसंस्थानमतुङ्गं स्यादलोमशम् ॥
अमांसलं कर्णयुगं समं मृदु समाहितम् ।
स्निग्धा नीलाश्च मृदवो मूर्द्धजाः कुञ्चितैकजाः ॥
स्त्रीणां समं शिरः श्रेष्ठं पादे पाणितले तथा ।
वाजिकुञ्जरश्रीवृक्षयूपेषु यवतोमरैः ॥
ध्वजचामरमालाभिः शैलकुण्डलवेदिभिः ।
शङ्खातपत्रपद्मैश्च मत्स्यस्वस्तिकसद्रथैः ।
लक्षणैरङ्कुशाद्यैश्च स्त्रियः स्यू राजवल्लभाः ॥
निगूढ़मणिबन्धौ च पद्मगर्भोपमौ करौ ।
न निम्नं नोन्नतं स्त्रीणां भवेत् करतलं शुभम् ॥
रेखान्वितान्त्वविधवां कुर्य्यात् सम्भोगिनीं स्त्रियम् ।
रेखा या मणिबन्धोत्था गता मध्याङ्गुलीं करे ॥
गता पाणितले या च योर्द्ध्वा पादतले स्थिता ।
स्त्रीणां पुंसां तथा सा स्याद्राज्याय च सुखाय
च ॥
कनिष्ठिका मूलरेखा कुर्य्याच्चेव शतायुषम् ।
प्रदेशिनीमध्यमाभ्यामन्तरालगता सती ॥
ऊना ऊनायुषं कुर्य्याद्रेखा चाङ्गुष्ठमूलगा ।